# Vasudevakritam Balaramakrishnayoh Stotram

# વસુદેવકૃતં બલરામકૃષ્ણયોઃ સ્તોત્રમ્

## Document Information

Text title : Vasudevakritam Balaramakrishnayoh Stotram

File name : vasudevakRRitaMbalarAmakRRiShNayoHstotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/85/3-18||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

# વસુદેવકૃતં બલરામકૃષ્ણયોઃ સ્તોત્રમ્

કૃષ્ણ કૃષ્ણ મહાયોગિન્ સઙ્કર્ષણ સનાતન ।
જાને વામસ્ય યત્સાક્ષાત્પ્રધાનપુરુષૌ પરૌ ॥ ૩॥

યત્ર યેન યતો યસ્ય યસ્મૈ યદ્યદ્યથા યદા ।
સ્યાદિદં ભગવાન્ સાક્ષાત્પ્રધાનપુરુષેશ્વરઃ ॥ ૪॥

એતન્નાનાવિધં વિશ્વમાત્મસૃષ્ટમધોક્ષજ ।
આત્મનાનુપ્રવિશ્યાત્મન્ પ્રાણો જીવો બિભર્ષ્યજ ॥ ૫॥

પ્રાણાદીનાં વિશ્વસૃજાં શક્તયો યાઃ પરસ્ય તાઃ ।
પારતન્ત્ર્યાદ્વૈસાદૃશ્યાદ્દ્વયોશ્ચેષ્ટૈવ ચેષ્ટતામ્ ॥ ૬॥

કાન્તિસ્તેજઃ પ્રભા સત્તા ચન્દ્રાગ્ન્યર્કર્ક્ષવિદ્યુતામ્ ।
યત્સ્થૈર્યં ભૂભૃતાં ભૂમેર્વૃત્તિર્ગન્ધોઽર્થતો ભવાન્ ॥ ૭॥

તર્પણં પ્રાણનમપાં દેવત્વં તાશ્ચ તદ્રસઃ ।
ઓજઃ સહો બલં ચેષ્ટા ગતિર્વાયોસ્તવેશ્વર ॥ ૮॥

દિશાં ત્વમવકાશોઽસિ દિશઃ ખં સ્ફોટ આશ્રયઃ ।
નાદો વર્ણસ્ત્વમોઙ્કાર આકૃતીનાં પૃથક્કૃતિઃ ॥ ૯॥

ઇન્દ્રિયં ત્વિન્દ્રિયાણાં ત્વં દેવાશ્ચ તદનુગ્રહઃ ।
અવબોધોભવાન્બુદ્ધેર્જીવસ્યાનુસ્મૃતિઃ સતી ॥ ૧૦॥

ભૂતાનામસિ ભૂતાદિરિન્દ્રિયાણાં ચ તૈજસઃ ।
વૈકારિકો વિકલ્પાનાં પ્રધાનમનુશાયિનમ્ ॥ ૧૧॥

નશ્વરેષ્વિહ ભાવેષુ તદસિ ત્વમનશ્વરમ્ ।
યથા દ્રવ્યવિકારેષુ દ્રવ્યમાત્રં નિરૂપિતમ્ ॥ ૧૨॥

સત્ત્વંરજસ્તમ ઇતિ ગુણાસ્તદ્વૃત્તયશ્ચ યાઃ ।
ત્વય્યદ્ધા બ્રહ્મણિ પરે કલ્પિતા યોગમાયયા ॥ ૧૩॥

તસ્માન્ન સન્ત્યમી ભાવા યર્હિ ત્વયિ વિકલ્પિતાઃ ।
ત્વં ચામીષુ વિકારેષુ હ્યન્યદાવ્યાવહારિકઃ ॥ ૧૪॥

ગુણપ્રવાહ એતસ્મિન્નબુધાસ્ત્વખિલાત્મનઃ ।
ગતિં સૂક્ષ્મામબોધેન સંસરન્તીહ કર્મભિઃ ॥ ૧૫॥

યદૃચ્છયા નૃતાં પ્રાપ્ય સુકલ્પામિહ દુર્લભામ્ ।
સ્વાર્થે પ્રમત્તસ્ય વયો ગતં ત્વન્માયયેશ્વર ॥ ૧૬॥

અસાવહમ્મમૈવૈતે દેહે ચાસ્યાન્વયાદિષુ ।
સ્નેહપાશૈર્નિબધ્નાતિ ભવાન્ સર્વમિદં જગત્ ॥ ૧૭॥

યુવાં ન નઃ સુતૌ સાક્ષાત્પ્રધાનપુરુષેશ્વરૌ ।
ભૂભારક્ષત્રક્ષપણ અવતીર્ણૌ તથાત્થ હ ॥ ૧૮॥

તત્તે ગતોઽસ્મ્યરણમદ્ય પદારવિન્દ-
માપન્નસંસૃતિભયાપહમાર્તબન્ધો ।
એતાવતાલમલમિન્દ્રિયલાલસેન
મર્ત્યાત્મદૃક્ત્વયિ પરે યદપત્યબુદ્ધિઃ ॥ ૧૯॥

સૂતીગૃહે નનુ જગાદ ભવાનજો નૌ
સઞ્જજ્ઞ ઇત્યનુયુગં નિજધર્મગુપ્ત્યૈ ।
નાનાતનૂર્ગગનવદ્વિદધજ્જહાસિ
કો વેદ ભૂમ્ન ઉરુગાય વિભૂતિમાયામ્ ॥ ૨૦॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે ઉત્તરાર્ધે
પઞ્ચાશીતિતમાધ્યાયાન્તર્ગતં વસુદેવકૃતં બલરામકૃષ્ણયોઃ
સ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૮૫/૩-૧૮॥

bhAgavatapurANa . adhyAya 10/85/3-18..

Proofread by PSA Easwaran

*Vasudevakritam Balaramakrishnayoh Stotram*

pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*